इत्वल: पुत्राख्यान्यास्तु प्रमदा: परिकीर्त्तिता: ॥
अल्पायुषि लघु छिन्ना दीर्घा छिन्ना महायुषि ।
शुभन्तु लक्षणं स्त्रीणां प्रोक्तं त्वशुभमन्यथा ॥"*॥
तस्या अशुभलक्षणं यथा,—
"कनिष्ठिकानामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गतौ यस्यास्त्वन्नी कुलटा च सा ॥
जङ्घाभ्यां पिण्डिकाभ्यां जङ्घे चातिशिरालके ।
रोमशे चातिमांसे च कुम्भाकारं तथोदरम् ॥
वामावर्त्तं निम्नमल्पं दुःखिताख्या गुह्यकम् ।
ग्रीवया ह्रस्वया निःस्वा दीर्घया च कुलक्षय: ॥
पृथुलया प्रचण्डाश्च स्त्रियः स्युर्नात्र संशयः ।
केकरे पिङ्गले नेत्रे स्यादे लोलेक्षणासती ॥
स्मिते कूपे गण्डयोश्च सा ध्रुवं व्यभिचारिणी ।
प्रलम्बिनि ललाटे च देवरं हन्ति चाङ्गना ॥
उदरे श्वशुरं हन्ति पतिं हन्ति स्फिचोर्द्वयोः ।
या तु रोमोत्तरौष्ठी स्यान्न शुभा भर्त्तुरेव हि ॥
स्तनौ सरोमावशुभौ कर्णौ च विषमौ तथा ।
करालविषमा दन्ता: क्लेशाय च भयाय च ॥
चौर्याय कृष्णमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ।
क्रव्यादरूपैर्हंसैश्च वृककाकादिसन्निभैः ॥
सिरालैर्विषमैः शुष्कैर्वित्तहीना भवन्ति हि ।
समुन्नतोत्तरोष्ठी या कलहे रूक्षकेशिनी ॥
स्त्रीषु दोषा विरूपाश्च! यत्राकारो गुणस्ततः ॥"
इति गरुड़पुराणम् ॥
(त्र्यक्षरवृत्तिविशेष: । इति छन्दोमञ्जरी ॥)

नारीकवचः, पुं, (नार्य्यः कवचः सन्नाह इव यस्य ।) सूर्य्यवंशीयमूलकराजः । स च अश्मक-पुत्रः । सौदासपौत्रश्च । "योऽसौ निःक्षत्रे क्ष्मातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः । ततस्तं नारीकवचमुदाहरन्ति ।" इति विष्णुपुराणे । ४ । ४ । ३८ ॥

नारीकेलः, पुं, (किल क्रीड़ने + भावे घञ् । नार्य्याः केल इव केलो सम्मोदो यत्र ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीकेली, स्त्री, (नारीकेल + गौरादित्वात् ङीष् ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीचं, क्ली, (नाड़ीच + ड़स्य लत्वम् ।) शाकविशेषः । नालिता इति भाषा ॥ तद्द्विविधं तिक्तं मधुरञ्च । तिक्तस्य गुणः । रक्तपित्तहरत्वम् । कृमिकुष्ठविनाशित्वञ्च । मधुरस्य गुणाः । पिच्छिलत्वम् । शीतत्वम् । विष्टम्भिकफवातकारित्वञ्च । इति राजवल्लभः ॥

नारीतरङ्गकः, पुं, (नारीं तरङ्गयति चञ्चलचित्तां करोतीति । तरङ्ग + क्रत्वौ णिच् + ण्वुल् ।) विटः । इति शब्दमाला ॥

नारीदूषणं, क्ली, (नार्य्या दूषणम् ।) स्त्रीणां दोषः । स च षड्विधः । यथा,—
"पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥"
इति मनुः ॥

नारीष्टा, स्त्री, (नारीणां इष्टा प्रिया ।) मल्लिका । इति राजनिर्घण्टः ॥

नार्य्यङ्गः, पुं, (नारीणामङ्गमिव शोभनं अङ्गं यस्य ।) नागरङ्गः । इति शब्दरत्नावली ॥ (नार्य्या अङ्गे, क्ली ॥)

नालं, क्ली, (नलतीति । नल बन्धे + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः ।) उत्पलादिदण्डः । तत्पर्य्यायः । नाला २ । इत्यमरः । २ । ६ । २२ ॥ नाली ३ नालिका ४ । इति भरतः ॥ (यथा, रघुः । ६ । १३ ।
"कश्चित् कराभ्यामुपगूढनाल-
मालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥"
अर्द्धर्चादित्वात् पुंलिङ्गोऽपि ॥) हरितालम् । इति स्वामी ॥ नले, पुं । इति राजनिर्घण्टः ॥

नालवंशः, पुं, (नालो वंश इव ।) नलः । इति राजनिर्घण्टः ॥

नाला, स्त्री, (नल बन्धे + णः । ततष्टाप् ।) नालम् । इत्यमरभरतौ ॥ डाँटा इति नाड़ा इति च भाषा । (नलति जलादिर्निर्गच्छत्यनयेति । नल + करणे घञ् । जलनिर्गममार्गः । यथा, मार्कण्डेये । ३ । ४३ ।
"यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥")

नालि:, स्त्री, (नालयतीति । नल + णिच् + इन् ।) नाड़ी । सिरा । इति द्विरूपकोषः ॥

नालिकः, पुं, (नल एव नालस्तृणविशेषः । स भोक्तव्यत्वेनास्त्यस्येति ठन् ।) महिषः । इति त्रिकाण्डशेषः ॥ क्ली, (नालमस्त्यस्येति ।) पद्मम् । इति शब्दरत्नावली ॥ (नालः कार्य्यसाधनत्वेनास्त्यस्येति । नाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् । अस्त्रविशेषः । तत्तु आग्नेयास्त्रादिना अधुनातनस्य 'बन्दूक' इति ख्यातस्य अस्त्रस्य सादृश्यं लभते । अस्य आकृत्यादिकन्तु शुक्रनीतौ उक्तम् । तद्यथा,—
"अस्त्रन्तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं बृहत्क्षुद्रप्रभेदतः ।
तिर्य्यगूर्द्ध्वच्छिद्रमूलं नालं पञ्चवितस्तिकम् ॥
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।
यन्त्राघाताग्निकृत् ग्रावचूर्णधृक् कर्णमूलकम् ॥
सुकाष्ठोपाङ्गबुध्नञ्च मध्याङ्गुलबिलान्तरम् ।
स्वान्तेऽग्निचूर्णसन्धातृ शलाकासंयुतं दृढम् ॥
लघुनालिकमप्येतत् प्रधार्य्यं पत्तिसादिभिः ।
यथा यथा तु त्वक्सारं यथा स्थूलबिलान्तरम् ॥
यथा दीर्घं बृहत् गोलं दूरभेदि तथा तथा ।
मूलकीलभ्रमात् लक्ष्यसमसन्धानभाजि यत् ॥
बृहन्नालिकसंज्ञन्तत् काष्ठबुध्नविवर्ज्जितम् ।
प्रवाह्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदम् ॥"
अस्य कार्य्यं यथा,—
"नालास्त्रं शोधयेदादौ दद्यात्तत्राग्निचूर्णकम् ।
निवेशयेत्तु दण्डेन नालमूले यथादृढम् ॥
ततः सुगोलकं दद्यात् ततः कर्णेऽग्निचूर्णकम् ।
कर्णचूर्णाग्निदानेन गोलं लक्ष्ये निपातयेत् ॥
लक्ष्यभेदी यथा बाणो धनुर्ज्यानिनियोगतः ।
भवेत्तथा तु सन्धाय——————॥")

नालिका, स्त्री, (नाला एव । स्वार्थे कन् । टापि अत इत्वम् ।) नाला । इति शब्दरत्नावली ॥ नालिताशाकः । इति शब्दमाला ॥ (यथा, सुश्रुते । १ । ४६ ।
"वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥")
चर्म्मकषा । इति जटाधरः ॥ हस्तिकर्णवेधनिका । इति हारावली । ३० ॥ (यथा, माघे । १७।३५।
"गजाः सपत्नकरतललोलनालिका
हता मुहुः प्रणदितघण्टमाययुः ॥")

नालिकेरः, पुं, (नारिकेलः । रलयोरैक्यात् रस्य लः । लस्य रश्च ।) नारिकेलः । इत्यमरटीकायां रमानाथः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथास्य गुणाः ।
"नालिकेरं सुमधुरं गुरुस्निग्धञ्च शीतलम् ।
हृद्यं संबृंहणं वस्तिशोधनं रक्तपित्तनुत् ॥
विष्टम्भि पक्वं मतिमन्नपक्वं कफवातलम् ।
बृंहणं शीतलं हृद्यं नालिकेरफलं विदुः ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
अस्य तोयगुणा यथा,—
"नालिकेरोदकं स्निग्धं स्वादु वृष्यं हिमं लघु ।
तृष्णापित्तानिलहरं दीपनं वस्तिशोधनम् ॥"
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

नालिजङ्घः, पुं, द्रोणकाकः । इति हारावली ।८४॥

नालिता, स्त्री, (नालमिता प्राप्ता ।) स्वनामख्यातशाकः । यथा,—
"नालिता पट्टशाकञ्च मिश्रमन्ते तु नालिका ।"
इति शब्दमाला ॥
अस्य गुणाः नारीचशब्दे द्रष्टव्याः ॥

नाली, स्त्री, (नालि + वा ङीष् ।) शाककाण्डकः । डाँटा इति भाषा । इति मेदिनी । ले, २८ ॥ हस्तिकर्णवेधनी । घटी । इति त्रिकाण्डशेषः ॥ नाड़ी । इत्यमरटीकायां भरतः ॥ (यथा,—
"रसवाहिनीश्च नालीर्जिह्वामूलगलतालुक्लोम्नः ।
संशोष्य नृणां देहे कुरुतस्तृष्णां महाबलावेतौ ।
पीतं पीतं हि जलं शोषयतस्तमतो न याति
शमम् ॥"
इति चरके चिकित्सास्थाने चतुर्विंशेऽध्याये ॥)
पद्मम् । इति शब्दरत्नावली ॥

नालीकः, पुं, (नाल्या नलयन्त्रात् कायति शब्दायते इति । कै + कः । घोरशब्देन निर्गमनादेवास्य तथात्वम् ।) शरः । (यथा, महाभारते । ३ । ३१० । १७ ।
"कर्णिनालीकनाराचांस्तूर्णन्तो महारथाः ।
नाविध्यन् शाल्ववास्तत्र पश्यन्तो ब्याममन्ति-
कात् ॥"
तथा च शार्ङ्गधरसंगृहीतधनुर्व्वेदे ।
"नालीका लघवो बाणा नलयन्त्रेण नोदिताः ।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥")